M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

No. Ser. 977

Title: Brahmayajna

977

Complete

C	Brahmayajne	Title
		Author
		Editor
		Year, Vols.
Sk		Publisher
977		Remarks

ॐअ देव पितृ

श्रीगणेशायनमः श्रीपरमेश्वरप्रीत्यर्थं ब्रह्मयज्ञं देवर्ष्याचार्यतर्पणं करिष्ये प्राधल्लामेरू०स
र्वेषामविरोधेनब्रह्मयज्ञंसमारभे यत्सव्यपाणिपादौ प्रोक्ष्य शिरश्चक्षुषीनासिके श्रोत्रे हृ
यमालभ्य विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमि प्रणवस्यपरब्रह्म ऋषिः परमात्म०
देवता दैवीगायत्रीछंदः व्याहृतीनां परमेष्ठी प्रजापतिः प्रजापतिर्बृहती अग्निमीळइत्या
दीनांछंदसां मधुच्छंदादय ऋषयः अग्न्यादयो देवताः गायत्र्यादीनिछंदांसि सर्वेषांब्र
ह्मयज्ञजपेविनियोगः ॐ अग्निमीळे० यदंगदाशुषे० २ अग्निर्वै देवानामवमो विष्णुः
परमः अथमहाव्रतं एषपंथा एतत्कर्म अथातः संहिताया उपनिषत् विदामघवं
न्विदा महाव्रतस्य पंचविंशति सामिधेन्यः इषेत्वोर्जेत्वा अग्न आ याहि वीतये शं
नोदेवीरभिष्टये अथैतस्यसमाम्नायस्य समाम्नायः समाम्नातः मयरसतज
भनलगसंमितं गौः ग्मा पंचसंवत्सरमयं अथ शिक्षां प्रवक्ष्यामि वृद्धिरादैच् यो
गीश्वरं याज्ञवल्क्यं नारायणं नमस्कृत्य अथातोधर्मं व्याख्यास्यामः अथातो

धर्मजिज्ञासा अथातो ब्रह्मजिज्ञासा तच्छ्रेयो राजु ० ॐ नमो ० ऋषिरसिवश्च मेपाध्यान
१ मतानसमुपागं ॥ ॥ ब्रह्मयज्ञः समाप्तः ॥ ॥ देवतास्तृप्येतु ॥ प्रजापतिस्तृप्यतु ।
ब्रह्मातृप्यतु ॥ वेदास्तृप्यंतु ॥ देवास्तृप्यंतु ॥ ऋषयस्तृप्यंतु ॥ सर्वाणिछंदां
सितृप्यंतु ॥ ॐकारस्तृप्यतु ॥ वषट्कारस्तृप्यतु ॥ व्याहृतयस्तृप्यंतु । सावि
त्रीतृप्यतु ॥ यज्ञास्तृप्यंतु । द्यावापृथिवीतृप्येतां ॥ अंतरिक्षंतृप्यतु । अहो
रात्राणितृप्यंतु । संख्यास्तृप्यंतु । सिद्धास्तृप्यंतु ॥ समुद्रास्तृप्यंतु ॥ नद्यस्तृ
प्यंतु ॥ गिरयस्तृप्यंतु ॥ क्षेत्रौषधिवनस्पतिगंधर्वा रसस्तृप्यंतु ॥ नागा
स्तृप्यंतु ॥ वयांसितृप्यंतु ॥ गावस्तृप्यंतु ॥ साध्यास्तृप्यंतु ॥ विप्रास्तृप्यंतु ॥
यक्षास्तृप्यंतु ॥ रक्षांसितृप्यंतु ॥ भूतानितृप्यंतु । एवमेतानितृप्यंतु ॥ अथ
ऋषयः ॥ शतर्चिनस्तृप्यंतु ॥ माध्यमास्तृप्यंतु ॥ गृत्समदस्तृप्यतु ॥ विश्वा रा. २
मित्रस्तृप्यतु ॥ वामदेवस्तृप्यतु ॥ अत्रिस्तृप्यतु ॥ भरद्वाजस्तृप्यतु ॥ वसिष्ठ

स्तृप्यतु ॥ प्रगाथास्तृप्यंतु ॥ पावमान्यस्तृप्यंतु ॥ क्षुद्रसूक्तास्तृप्यंतु ॥ महा
सूक्तास्तृप्यंतु ॥ प्राचीनावीती ॥ सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभा
रतमहाभारतधर्माचार्यास्तृप्यंतु ॥ जानंतिबाहविगार्ग्यगौतमशाक
ल्यबाभ्रव्यमांडूकेयास्तृप्यंतु ॥ गार्गीवाचक्नवीतृप्यतु ॥ वडवाप्रातीथे
यीतृप्यतु ॥ सुलभामैत्रेयीतृप्यतु ॥ कहोलंतर्पयामि ॥ कौषीतकंतर्प
यामि ॥ महाकौषीतकंतर्पयामि ॥ पैंग्यंतर्पयामि ॥ महापैंग्यंतर्पया
मि ॥ सुयज्ञंतर्पयामि ॥ सांख्यायनंतर्पयामि ॥ ऐतरेयंतर्पयामि ॥ महैतरे
यंतर्पयामि ॥ शाकलंतर्पयामि ॥ बाष्कलंतर्पयामि ॥ सुजातवक्त्रंतर्पया
मि ॥ औदवाहिंतर्पयामि ॥ महौदवाहिंतर्पयामि ॥ सौजामिंतर्पयामि ॥ शौ
नकंतर्पयामि ॥ यमंतर्पयामि ॥ ये चान्ये आचार्यास्ते सर्वे तृप्यंतु ।